Ref. No. Ex/SANS/PG/3.3E/ 75 /2018 (S)

**Master of Arts Examination, 2018**

**(SPECIAL SUPPLEMENTARY)**

(2nd Year, 3rd Semester)

**SANSKRIT**

**Course: XIII/E**

**[A General Survey of Indian Epigraphy]**

Full Marks: 30 Time: Two Hours

*The figures in the margin indicate full marks*

१। अधोलिखितेषु त्रयः प्रश्नाः सुरगिरा देवनागरीमाश्रित्य समाधेयाः। 1X3=3

(क) ब्युलर्–महोदयेन ब्राह्म्या लिपेरुत्पत्तिः कुतः प्रस्ताविता?

(ख) खरोष्ट्या लिपेः पाठोद्धारस्य प्रथमं सूत्रं कुत्र प्राप्तम्?

(ग) मौखरिराजस्य अनन्तवर्मणः गयाभिलेखस्य पाठोद्धारः केन कृतः?

(घ) प्राचीनब्राह्मीलिपेः पाठोद्धारविषये कः विद्वान् प्रथमतः सफलः बभूव?

(ङ) प्राचीनब्राह्म्या आदितमं निदर्शनं कुत्र प्राप्तम्?

२। अधोलिखितेषु त्रयः प्रश्नाः समाधेयाः। तेषु अन्यतमः सुरगिरा देवनागर्या लिप्या लेखनीयः। 4X3=12

(क) खरोष्टीति नाम्नः व्याख्या ब्रतीन्द्रनाथमुखोपाध्यायपादैः कथं प्रस्तुता ?

(ख) अशोकाभिलेखोपलब्धायाः ब्राह्म्याः वैशिष्ट्यानि सोदाहरणं वर्ण्यन्ताम्।

(ग) निम्नोक्तानां वर्णानां विवर्तनं प्राचीनब्राह्मीतः गौडीं यावत् सचित्रं प्र दर्श्यताम् –

ड, ग, त।

(घ) ब्युलर्–महोदयेन भारतवर्षे अरमीयवर्णमालायाः प्रचलनमधिकृत्य का युक्तय उपन्यस्ताः?

(ङ) उत्तरकालीनब्राह्म्या वैशिष्ट्यानि उल्लिख्यन्ताम्।

P.T.O.

## ख–विभागः

३। अधोलिखितेषु त्रयः प्रश्नाः सुरगिरा देवनागरीमाश्रित्य समाधेयाः। 1X3=3

(क) जोगिमारागुहालेखस्य का भाषा?

(ख) गान्धारप्राकृतभाषया विरचितेषु लेख्येषु का लिपिः उपयुक्ता?

(ग) आइहोल्–प्रशस्त्यां रविकीर्तिना कस्य कविद्वयस्य उल्लेखः क्रियते?

(घ) ख–खण्ड–लकार–शब्दैः कासां संख्यानां बोधो भवति?

(ङ) शकाब्दस्य खिस्टाब्देन परिणमनस्य को विधिः?

४। ङ–**चिह्नितः प्रश्नोऽवश्यमेव समाधेयः**। अन्येषु द्वितयं समाधेयम्। तयोरे**कतरस्य** उत्तरं संस्कृतेन देवनागर्या च लेखनीयम्। 4 X3=12

(क) "इ–एच्–एस्"–भाषाया उद्भवमाश्रित्य प्रचलितानि तत्त्वानि समुप न्यस्यन्ताम्।

(ख) विक्रमाब्दमाश्रित्य संक्षिप्तो निबन्धो विरचनीयः।

(ग) हरिषेणप्रणीताया एलाहाबादप्रशस्तेः काव्यगुणा वि चार्यन्ताम्।

(घ) अभिलेखसाहित्यस्य गौरवम् आ लोच्यताम्।

(ङ) अधोलिखितानां संकेतानां देवनागर्या अङ्केन परिणमनं कार्यम्।

- पक्षरामाम्बरशशि....।
- पयोधिशरषट्कुमिते...।
- मुन्यृष्यृत्विन्दु...।
- शर्वास्यस्मरसायकर्तुशशभृत्...।
- सिन्ध्वनलारिवसुन्धरा...।
- खयुगमुनिकुशाके।
- खाङ्कर्तुधरामाने शाकहायने।
- तिथिकलाप्रमिते शाकेऽब्दे।